## दानीं च (१८/१८६७)

इदमः सप्तम्यन्तात् काले वर्तमानाद् दानीं प्रत्ययो भवति । अस्मिन् काले इदानीम्[1] ॥

## तदो दा च । (१९/१९६८)

तदः सप्तम्यन्तात् काले वर्तमानाद् दा [2]प्रत्ययो भवति, चकाराद् दानीं च । तस्मिन् काले तदा, तदानीम् । तदो दावचनमनर्थकं,[3] विहितत्वात्[4] ॥

## तयोर्दार्हिलौ च छन्दसि । (२०/३४००)

तयोः इति प्रातिपदिकनिर्देशः । तयो[5]रिदमः तदश्च यथासङ्ख्यं दार्हिलौ प्रत्ययौ भवतश्छन्दसि विषये । चकाराद् यथाप्राप्तं च । [6]इदावत्सरीयः (काठ. सं. १३.१५) । इदं तर्हि । इदानीम् । तदानीम् ॥

## अनद्यतने र्हिलन्यतरस्याम् । (२१/१९६९)

छन्दसि इति न [7]स्वर्यते । सामान्येन विधानम् । किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्यः अनद्यतने [8]कालविशेषे [9]वर्तमानेभ्यः र्हिल् प्रत्ययो भवत्यन्तरस्याम् । कर्हि, कदा । यर्हि, यदा । तर्हि, तदा[10] ॥

## सद्यः परुत् परार्यैषमः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः । (२२/१९७०)

सप्तम्याः इति काले इति च [11]वर्तते । सद्यःप्रभृतयः शब्दाः निपात्यन्ते । [12]प्रकृतिः, प्रत्ययः, आदेशः, कालविशेषः इति सर्वमेतन्निपातनाल् लभ्यते । समानस्य सभावो निपात्यते द्यश्च प्रत्ययः अहन्यभिधेये । (म. भा. २.४०७) । समानेऽह्नि सद्यः । पूर्वपूर्वतरयोः परभावो निपात्यते उदारी च प्रत्ययौ संवत्सरेऽभिधेये (म. भा. २. ४०७) । पूर्वस्मिन् संवत्सरे परुत् । पूर्वतरे संवत्सरे परारी । इदम इश्भावः समसण् प्रत्ययः [13]निपात्यते संवत्सरेऽभिधेये । अस्मिन् संवत्सरे ऐषमः (म.भा. २.४०७) । [14]परस्माद् एद्यवि प्रत्ययोऽहनि । परस्मिन्नहनि परेद्यवि । इदमोऽश्भावो[15] द्यश्च प्रत्ययोऽहनि[16] (म.भा. २.४०७) । अस्मिन्नहनि अद्य । पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युस् प्रत्ययो निपात्यते अहन्यभिधेये (म.भा. २.४०७) । पूर्वस्मिन्नहनि पूर्वेद्युः । अन्यस्मिन्नहनि अन्येद्युः । अन्यतरस्मिन्नहनि अन्यतरेद्युः । इतरस्मिन्नहनि इतरेद्युः । अपरस्मिन्नहनि अपरेद्युः । अधरस्मिन्नहनि अधरेद्युः । [17]उभयोरह्नोः उभयेद्युः । उत्तरस्मिन्नहनि उत्तरेद्युः ।

[६०५] द्युश्चोभयाद् वक्तव्यः । (म.भा. २.४०८)

उभयद्युः ॥

---

1. योगविभागः उत्तरार्थः इत्यधिकम् क. 2. प्रत्ययो नास्ति फ. 3. सर्वैकान्यत्किंयत्तदः काले दा (5.3.15/2964) इत्यधिकम् क. ड. 4. वैचित्र्यार्थः इत्यधिकम् क. 5. सप्तम्यन्तात् काले इत्यधिकम् ड. इदावत्सरीयम् ब.ड, इदावसेरियं क, तर्हि क्वेदानीम् अवकल्पयेथाः इत्यधिकम् क, इदावत्सरीयं तर्हि त्वेदानीं कल्पयेथास्तदानीम् ह. 7. स्मर्यते क. 8. काले क. 9. वर्तमानेभ्यः नास्ति फ. 10. एतस्मिन् काले एतर्हि एतदा इत्यधिकम् ग. 11. अनुवर्तते ब.क. 12. प्रकृतिप्रत्ययादेशाः क. 13. भवति । णकारोऽचो ञ्णिति इति विशेषणार्थः । अनेनैव च वृद्धेः संवत्सरेऽभिधेये क. 14. परशब्दाद् क. 15. निपात्यते इत्यधिकम् क. 16. अभिधेये इत्यधिकम् क. 17. उभयोरह्नोः नास्ति फ.